International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

# मनुस्मृतौ मानवीयमूल्यानि

**Dr. Sk. Nagamastanvali**
**Guest faculty**
**Dept of puranetihasa**
**National sanskrit university**
**Tirupati**
**Cell : 9492606567**

श्रुतिः स्मृतिः सदाचारः इत्येते धर्मस्य प्रमाणानि। स्मृतिः नाम धर्मशास्त्रम्। पुरतनैः आचार्यैः पुराणान्यपि स्मृति शब्देन व्यवहृतानि। शङ्करभगवत्पादैः "इति स्मृतेः" इत्यादि वचनैः पुराणवचनान्यपि उदह्रीयन्ते। इदानीं काले मनुस्मृतिः सर्वथा न अनुसरणीया इति केचन वदन्ति। अपि च तत्र कुलादिविवक्षा वर्तते सर्वे आचाराः न पालनीयाः इत्यपि अनुष्ठानस्य अयोग्यत्वं तस्याः वदन्ति। वर्णाश्रमधर्मविपर्ययेन यद्यपि नानुष्ठेयत्वं तथापि साधारणधर्माः लौकिकाः अनुष्ठेयाः एव। वर्णाश्रमव्यवस्थापि वृत्तिकल्पनाय कृत्वा न परपीडनाय कालान्तरे दुर्व्याख्यातृभिः वर्णधर्माणां अन्यथा व्याख्या कृता। आश्रमधर्माश्च जीवितसाफल्यसंपादनाय विहिताः तदापि यावज्जीवं गृहस्थाश्रमे स्थितिः अपि स्मृतिषु अङ्गीकृता। ब्राह्मणाय इदं द्रव्यं इयत् देवयं इति सर्वासु स्मृतिषु दृश्यते एव। वृत्तिकर्शितानां कार्यान्तरं कर्तुमशक्तानां विषये दानं धर्मशास्त्रेष्वपि प्रशस्तम्। एषास्य वर्णिकीवृत्तिः इति नियमेन नियतया वृत्त्या जीवनं यापयितुं शक्यते स्म। इदानीं वृत्तिसाङ्कर्येण सर्वे आत्मनमपि पोषयितुं अशक्ताः अभूवन्। अतः वर्णधर्माः न निन्द्याः आश्रमधर्मैः मनुष्यः स्वाश्रमात् विरुद्धं चिन्तयितुं न शक्नोति स्म। अतः दुराचारः दुर्बुद्धिश्च न भवति स्म। पुराणानुसारेण स्मृतीनां मतेन यस्य यद् विहितं तदेव कर्तव्यमासीत्।

मनुस्मृतौ एवंविधाः साधारणाः लौकिकाः धर्माः बहवः उपदिष्टाः। तेषु गूढं मानवीयमूल्यं च वर्तते। क्वचित् साक्षात् मानवीयमूल्यं उपदिष्टं दृश्यते।

**युगधर्मनिर्णयः –**

**तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते।**

ISSN 2581-7795

**द्वापरे यज्ञमेवाहुर्दानमेकं कलाभुगे॥1**

अपि च योग्याय धनरहिताय फलनिरपेक्षया कृतं दानं सात्त्विकं भवति तदेव फलप्रदमिति स्मृत्यन्तरे दृष्टञ्च।

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**

**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥2**

**अहिंसा वाक्शुद्धिः, मनसः शुद्धिश्च –**

**अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।**

**वाक्यैव मधुराश्लक्ष्णा प्रयोज्या धर्ममिच्छता॥**

**यस्य वाङ्मनसी शुद्धे सम्यगुप्ते च सर्वदा।**

**स वै सर्वमवाप्नोति वेदान्तोपगतं फलम्॥3**

गुरुः शिष्यविषये क्रोधं त्यक्त्वा तान् अहिंस्यात् दयया योग्यात् विषयान् बोधयेत्। मधुरया वाचा एवमनुनयेत् यस्य त्रिकरणानि शुद्धानि सं वेदान्ताध्ययनादपि अधिकं फलं लभते। न केवलम् उपाध्यायानामेव अयं नियमः पर्याप्तः। किन्तु सर्वैः अपि अनुष्ठेय। वाचाशुद्धः मनसा शुद्धश्च शान्तिं, सुखं प्राप्नोति। सर्वजनप्रियश्च भवति इति मानवीयं मूल्यं मनुना विश्वजनीनं दर्शितम्।

**स्त्रीणां सम्माननम्, दाम्पत्यधर्मः –**

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**

**यत्रैतास्तु न पूज्यन्ते स्रवास्तत्राफलाः क्रियाः॥4**

पिता, भ्राता, पुत्रः, पतिर्वा स्त्रियं सदा पूजयेदेव। यस्मिन् गृहे स्त्रियः पूजिताः भवन्ति तत्र देवाः प्रीत्या वसन्ति। यत्र स्त्रियः पराभूताः तद्गृहे सर्वाः क्रियाः निष्फलाः भवन्ति। यस्मिन् गृहे कुले वा स्त्रीणां शोकः भवति तत् कुलं नश्यति। स्त्रियः यत्र पूजिताः भवन्ति वस्त्राभरणादि प्रदानेन संतुष्टाश्च भवन्ति तत्र सर्वं शुभं भवति।

**दाम्पत्य धर्मश्च मनुष्ययज्ञः –**

**सन्तुष्टो भार्यया भर्ता भर्ता भार्या तथैव च।**

**यस्मिन्नेव कुले नित्यं कल्याणं तत्र वैध्रुवम्॥5**

दम्पती अन्योन्यं प्रीणयन्तौ यदा भवतः तदा विश्वश्रेयः भवति अन्योन्यानुरागवतोः दम्पत्योः सन्तानमपि शुभानि प्राप्नोति। गृहकलहैः पुत्राः कुमार्योवा व्याकुलिताः भवन्ति। तेषां मनसः शान्तिः न जायते। दाम्पत्यस्य धर्मः कलहायितः इति तेषां मनसि दृढः विश्वासः रूढः भवति। तेषामपि दाम्पत्यं तथैव भवेदिति। एवं परम्परावर्तनेन सर्वोऽपि समाजः कलुषी भवति। प्रथमं भार्या भर्तुः प्रिया भवेत्। यस्य भार्या प्रिया प्रियवादिनी च भवति स पुरुषः सुखी भवतीति महाभारते स्पष्टम्।

**मनुष्ययज्ञः –**

जातः मनुष्यः पञ्चभिः यज्ञैः ऋणवान् भवति। देवाः पितरः भूतानि मनुष्याः ऋषयः इति पञ्च सदा अर्चनीयाः। तेषां पूजनेन ऋणात् विमुच्यते। देवपूजनं, देवयज्ञः, तर्पणश्राद्धादिकरणं पितृयज्ञः, मनुष्येभ्यः भोजनदानं मनुष्ययज्ञः, भूतेभ्यश्च पशुपक्षादिभ्यः आहारदानं भूतयज्ञः। स्वशाखाध्ययनम् ऋषियज्ञः। मनुष्ययज्ञेन बहूनां आहारसंवृद्धिः भवति। एकैकः गृहस्थः न्यूनतयापि प्रत्यहं मनुष्यं भोजयेत् इत्यनेन अन्नार्थः कुत्रचित् न भवतीति शक्तः बहून् भोजयेत्।

**ऋषयः पितरो देवा भूतान्यति य यस्तथा।**

International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

**आशासते कुटुंबिभ्यस्तेभ्यः कार्यं विजानता॥6**

**एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके।**

**न चैवात्राशयेत्कश्चिद्वैश्वदेवं प्रतिद्विजम्॥7**

मनुस्मृतिः अतिप्रचीन इति हेतोः तात्कालिकीं सामाजिकस्थितिः प्रदर्शिता। वर्णादीनां आधिक्यक्रमं प्रायश्चित्ते दण्डनविधौ तारतम्यं दर्शितम्। अतः लोकपरिवृत्तेः तदानीं मानवीयमूल्यतया प्रसिध्यान्यपि अत्र न गृहीतानि। अद्यतनकालेऽपि ये ये उपकारकाः विषयाः मानवीयमूल्यबोधकाः विश्वजनीनाः ते एव अत्र स्वीकृतः। प्रायशः मानवीयमूल्यानि कलियुगे विशेषतः अद्यतनकाले नष्टप्रायानि दृश्यन्ते। श्रुतिः स्मृतिः ग्रन्थप्रतिनिधिरूपेण मनुस्मृतिं स्वीकृत्य, अद्यतनकाले मानवीयमूल्यानां ह्रासहेतवः निवारणार्थं च समाजे मानवीयमूल्यानां पुनरुद्धरणार्थं सम्प्रतिकाले स्मृतिग्रन्थेषु आचरितश्च निरुपितः मूल्यान्। मानवीयमूल्यान् आचरणत्वेन जनेषु सम्यक् शान्तिः भविष्यतीति निरूपणं कृत्वा एतत् शोधपत्रं अधुना सर्वेषां उपयुक्तं भविष्यतीति अहं चिन्तयित्वा लोकहितायश्च समाजहिताय एतत् शोधपत्रे मानवीयमूल्यवर्धनार्थंश्च पुनरुद्धरणार्थं सर्वे भारतीयाश्च पाश्चात्यदेशीय जनानामपि मानवीयमूल्यरक्षणाय अयं शोधपत्रं उपयुज्यतीति चिन्तयित्वा धन्यवादान् प्रकटीकृत्वा विरमामि विस्तरात्।

## References

1. मनुस्मृतिः 1/87
2. मनुस्मृतिः 2/1
3. मनुस्मृतिः 2/159, 160
4. मनुस्मृतिः 3/56
5. मनुस्मृतिः 3/55
6. मनुस्मृतिः 3/80
7. मनुस्मृतिः 3/83